# Bhaumakrita Shri Ganesha Stuti

# ભૌમકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Bhaumakrita Shri Ganesha Stuti

File name : gaNeshastutiHbhaumakRRitA.itx

Category : ganesha, gaNeshapurANa, stuti

Location : doc_ganesha

Proofread by : Preeti Bhandare

Description/comments : shrIgaNeshapurANaM upAsanA (pUrva)khaNDaH | adhyAya 60 | 1.60 22-35||

Latest update : April 20, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 20, 2024

*sanskritdocuments.org*

# ભૌમકૃતા શ્રીગણેશસ્તુતિઃ

(અઙ્ગારક ચતુર્થી વ્રતસ્તોત્રમ્)
ભૌમ ઉવાચ ।
નમસ્તે વિઘ્નનાશાય નમસ્તે વિઘ્નકારિણે ।
સુરાસુરાણામીશાય સર્વશક્ત્યુપબૃંહિણે ॥ ૨૨॥

નિરામયાય નિત્યાય નિર્ગુણાય ગુણચ્છિદે ।
નમો બ્રહ્મવિદાં શ્રેષ્ઠ ! સ્થિતિસંહારકારિણે ॥ ૨૩॥

નમસ્તે જગદાધાર ! નમસ્ત્રૈલોક્યપાલક ! ।
બ્રહ્માદયે બ્રહ્મવિદે બ્રહ્મણે બ્રહ્મરૂપિણે ॥ ૨૪॥

લક્ષ્યાલક્ષ્યસ્વરૂપાય દુર્લક્ષણભિદે નમઃ ।
નમઃ શ્રીગણનાથાય પરેશાય નમો નમઃ ।
ઇતિ સ્તુતઃ પ્રસન્નાત્મા પરમાત્મા ગજાનનઃ ॥ ૨૫॥

યવાચશ્લક્ષ્ણયા વાચા બાલકં સમ્પ્રહર્ષયન્ ।
ગજાનન ઉવાચ ।
તવોગ્રતપસા તુષ્ટો ભક્ત્યા સ્તુત્યાऽનયાऽપિ ચ ॥ ૨૬॥

બાલભાવેऽપિ ધૈર્યાત્તે દદામિ વાઞ્છિતાન્ વરાન્ ।
એવમુક્તો ભૂમિપુત્રો વચ ઊચે ગજાનનમ્ ॥ ૨૭॥

ભૌમ ઉવાચ ।
ધન્યા દૃષ્ટિર્જનનમપિ મે દર્શનાત્તે સુરેશ
ધન્યં જ્ઞાનં કુલમપિ વિભોઃ ભૂઃ સશૈલાऽદ્ય ધન્યા ।
ધન્યં ચૈતત્ સકલમપિ તપો યેન દૃષ્ટોऽખિલેશો
ધન્યા વાણી વસતિરપિ યયા સંસ્તુતો મૂઢભાવાત્ ॥ ૨૮॥

યદિ તુષ્ટોऽસિ દેવેશ ! સ્વર્ગે ભવતુ મે સ્થિતિઃ ।
અમૃતં પાતુમિચ્છામિ દેવૈઃ સહ ગજાનન ॥ ૨૯॥

કલ્યાણકારી મે નામ ખ્યાતિમેતુ જગત્ત્રયે ।
દર્શનં મે ચતુર્થ્યાં તે જાતં પુણ્યપ્રદં વિભો ॥ ૩૦॥

અતઃ સા પુણ્યદા નિત્યં સર્વસઙ્કષ્ટહારિણી ।
કામદા વ્રતકર્તૃણાં ત્વત્પ્રસાદાત્ સદાઽસ્તુ ચ ॥ ૩૧॥

ગણેશ ઉવાચ ।
અમૃતં પાસ્યસે સમ્યગ્ દેવૈઃ સહ ધરાસુત ! ।
મઙ્ગલેતિ ચ નામ્ના ત્વં લોકે ખ્યાતિં ગમિષ્યસિ ॥ ૩૨॥

અઙ્ગારકેતિ રક્તત્વાદ્ વસુમત્યા યતઃ સુતઃ ।
અઙ્ગારકચતુર્થીં યે કરિષ્યન્તિ નરા ભુવિ ॥ ૩૩॥

તેષામબ્ધસમં પુણ્યં સઙ્કષ્ટીવ્રતસમ્ભવમ્ ।
નિર્વિઘ્નતા સર્વકાર્યે ભવિષ્યતિ ન સંશયઃ ॥ ૩૪॥

અવન્તીનગરે રાજા ભવિષ્યસિ પરન્તપ ! ।
વ્રતાનામુત્તમં યસ્માત્ કૃતં તે વ્રતમુત્તમમ્ ॥ ૩૫॥

યસ્ય સઙ્કીર્ત્તનાન્મર્ત્યઃ સર્વાન્ કામાનવાપ્નુયાત્ ।

ઇતિ ભૌમકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા અથવા
અઙ્ગારકચતુર્થી વ્રતં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીગણેશપુરાણં ઉપાસના (પૂર્વ)ખણ્ડ । અધ્યાય ૬૦ । ૧.૬૦ ૨૨-૩૫॥

- .. shrIgaNeshapurANaM upAsanA (pUrva)khaNDa . adhyAya 60 . 1.60 22-35..

Proofread by Preeti Bhandare

*Bhaumakrita Shri Ganesha Stuti*
pdf was typeset on April 20, 2024

Please send corrections to *sanskrit@cheerful.com*